# Sāmānyadūṣaṇa

By Aśoka

Funders: Deutsche Forschungsgemeinschaft and The National Endowment for the Humanities
Principal: Birgit Kellner
data entry by: Aurorachana, Auroville
prepared for SARIT by: Liudmila Olalde

## Edition Statement

## Publication Statement

Availability: restricted
Copyright Notice:
Copyright 2016 SARIT
SARIT assumes no responsibility for unauthorised use that infringes the rights of any copyright owners, known or unknown.

## Source Description

| | |
|---|---|
| Title: | Aśokanibandhau Avayavinirākaraṇaṃ Samānyadūṣaṇaṃ ca |
| Author: | Aśoka |
| Editor: | Anantalal Thakur |
| Publisher: | Kashi Prasad Jayaswal Research Institute |
| Place of Publication: | Patna |
| Date: | 1974 |
| Note: | The manuscript consulted by Thakur is described below. |

RatnakīrtinibandhaR [1]
Ratnakīrti
Ratnakīrtinibandha
Aśoka
Avayavinirākaraṇa
Aśoka
Sāmānyaduṣaṇa
Thakur had access only to photographs of the palm-leave manuscript.
The Avayavinirākaraṇa covers folios 78b1-82a5. The Sāmānyaduṣana covers folios 82a5-84b1. Both texts are placed between the Citrādvaitaprakāśavāda and the Santānāntaradūṣaṇa. The scribe is the same as in the Ratnakīrtinibandha. Each side of a folio consists of six lines of ca. 138 syllables. The inner four lines leave a gap of 12 syllables for two perforations in the palm-leaves. The script is proto-Maithili.
Photographs of manuscripts brought by Rahula Sankrityayana from Tibet discovered by Anantalal Thakur while editing the Ratnakīrtinibandhāvalī.

| | |
|---|---|
| Title: | Six Buddhist Nyāya Tracts in Sanskrit |
| Editor: | Mahāmahopadhyāya Haraprasād Shāstri |
| Publisher: | The Asiatic Society |
| Place of Publication: | Calcutta |
| Date: | 1910 |

## Encoding Description

In the source file, there were two types of line breaks: returns (and possible surrounding space) and hyphens+returns. These were replaced with lb-elements. The ed-attribute "tha" refers to Thakur's 1974 edition.
The folio numbers were encoded as pb-elements with the ed-attribute "msR", which refers to the manuscript used by Thakur.
Round brackets (1 occurrence) were encoded as hi rend="brackets".
Additions in square brackets were enclosed in a supplied-element.
Underlined items were enclosed in a hi rend="underline".
In the note-elements the lbs were removed.

1 This description is based on Thakur's introduction to his 1974 edition (pp. vii-viii).

The footnotes were encoded as note-elements with their corresponding n-attribute. The footnote references were replaced by the note-elements.

## Revision Description

2016-05-26: Corrected the second reference to footnote 13-3 to 13-4. By Liudmila Olalde

2016-05-31: Replaced add with supplied and updated the encoding description. By Liudmila Olalde

/p. 11/

# ॥ सामान्यदूषणम् ॥

/p. 82a/

व्यापकं नित्यमेकं च सामान्यं यैः प्रकल्पितम् ।
मोहग्रन्थिच्छिदे तेषां तदभावः प्रसाध्यते ॥

कथमिदमवगम्यते परस्परविलक्षणक्षणेषु [1] प्रत्यक्षसमीक्ष्यमाणेष्वभिन्नधीध्वनिप्रसवनिबन्धनमनुयायिरूपं सामान्यं न मान्यं मनीषिणामिति ? साधकप्रमाणविरहाद् बाधकप्रमाणसंभवाच्चेति ब्रूमः ।

तथा हि यदिदं सामान्यसाधनमनुमानमभिधीयते परैः,
यदनुगताकारं ज्न्ँआनं तदनुगतवस्तुनिबन्धनम् ।
यथा बहुषु पुष्पेषु स्रक् स्रगिति ज्न्ँआनम् ।

/p. 82b/ अस्ति च परस्परसंपर्कविकलकलासु कार्यादिव्यक्तिष्वनुगताकारं विज्न्ँआनं तदनैकान्तिकतादोषाक्रान्तशरीरत्वान्न तद्भावसाधनायालम् । यतो भवति बहुषु पाचकेषु पाचकः पाचक इति एकाकारपरामर्शप्रत्ययः । न च तेष्वनुगतमेकं वस्तु समस्ति । तद्भावे हि प्रागेव तथाविधप्रत्ययोत्पादप्रसङ्गो दुर्वारप्रचारः ।

क्रियोपकारापेक्षाणां स्वलक्षणानां सामान्यव्यन्ँजकत्वादयमदोष इति चेत् ? नैतदस्ति । नित्यानामनाधेयातिशयतयानुपकारिणि सहकारिण्यपेक्षायोगात् । सातिशयत्वे वा प्रतिक्षणं विशरारुशरीरत्वात् क्रिया कुत इति दोषो दुष्परिहरः । क्रियानिबन्धनत्वात् पाचकेष्वनुगताकारप्रत्ययस्य नानैकान्तिकतादोष इत्यपि वार्तम् । प्रतिभेदं भिद्यमानानां कर्मणां तन्निबन्धनत्वायोगात् । भिन्नानामप्यभिन्नाकारज्न्ँआननिबन्धनत्वे व्यक्तीनामपि तथाभावो न राजदण्डनिवारितः । ततश्च सामान्यमेव नोपेयं स्यादिति मूलहरं पक्षमाश्रयता देवानांप्रियेण सुष्ठु अनुकूलमाचरितम् । अनेनैव न्यायेन क्रियाकारकसंबन्धमभिन्नज्न्ँआननिबन्धनमुपकल्पयन् प्रतिक्षिप्तः ।

/p. 12/

पाकक्रियात्वनिबन्धनः पाचकेष्वनुगताकारः प्रत्ययः । तता नानैकान्तिकतादोष इत्यपि न मन्तव्यम् । न ह्यर्थान्तरसंबन्धिनी जातिरर्थान्तरप्रत्ययोत्पत्तिहेतुः, अतिप्रसङ्गात् ।

स्यादेतत् । समवेतसमवायसंबन्धबलात् पाकक्रियासामान्यं पाचकेष्वभिन्नाकारं परामर्शप्रत्ययमुपजनयति । ततो न यथोक्तो दोषः ।

तदिदमप्यसारम् । यत उदयानन्तरापवर्गितया [2] कर्मणामेवासंभवात्, विनष्टे कर्मणि तत्सामान्यं न कर्मणि तदभावादेव, नापि कर्तरीति संबद्धसंबन्धोऽप्यस्य नास्तीति नाभिन्नप्रत्ययहेतुः । तस्मात् स्थितमेतत् तदनैकान्तिकतादोषदुष्टत्वात् नेदमनुमानं सामान्यसत्तासाधनाय पर्याप्तमिति ।

इतश्चापि न सामान्यसत्तासाधनमिदमनुमानम् । यथैव हि परस्परासङ्कीर्णस्वभावा अपि शाबलेयादयो भावाः कयाचिदेव तदेककार्यप्रतिनियमलक्षणया स्वहेतुबलायातया प्रकृत्या तदेकमभिमतमनुगतरूपमुपकुर्वते, तदपरसामान्यान्तरमन्तरेणान्यथानवस्थाप्रसङ्गात्, तथा [3] तवैकं परामर्शप्रत्ययमुपजनयन्तु किमन्तरालगडुना व्यतिरेकवता सामान्येनोपगतेन ?

अथोच्यते । प्रतिनियतशक्तयः सर्व /p. 83a/ भावाः । एतच्च सामान्यापलापिभिरपि नियतमभ्युपगमनीयम् । अन्यथा कुतः शालिबीजं शाल्यङ्कुरमेव जनयति न कोद्रवाङ्कुरमिति परपर्यनुयोगे भावप्रकृतिं मुक्त्वा किमपरमिह वचनीयमस्ति ?

एतच्चोत्तरमस्माकमपि न वनौकःकुलकवलितम् । तथा हि वयमप्येवं शक्ता एव वक्तुम् । सामान्यमेवोपकर्तुं शक्तिर्व्यक्तीनां भेदाविशेषेऽपि न तदेकं विज्न्ँआनमुपजनयितुमिति ।

---

1 °क्षणलक्षणेषु R
2 यत् °वर्जितया S
3 तमेकं S

अनुत्तरं बत दोषसङ्कटमत्रभवान् दृष्टिदोषेण [4] प्रवेश्यमानोऽपि नात्मानमात्मना संवेदयते । तथा हि शालिबीजतदङ्कुरयोरध्यक्षानुपलम्भनिबन्धने कार्यकारणभावेऽवगते शालिबीजं शाल्यङ्कुरं जनयितुं शक्तं न कोद्रवाङ्कुरमिति शक्यमभिधातुम् । नैवं सामान्यतद्वतोरुपकार्योपकारकभावः कुतश्चन /p. 13/ प्रमाणात् निश्चितः । तत् कथमिदमुत्तरमभिधीयमानमादधीत साधिमानमित्यलमलीकनिर्बन्धनेन ? न साधकप्रमाणविरहमात्रेण प्रेक्षावताम् असद्व्यवहारः । ततस्तदभावसाधकमनुमानमभिधीयमानमस्माभिराकल्प्यताम्[5] ।

यद् यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते, तत्तदसदिति प्रेक्षावद्भिः व्यवहर्तव्यम् ।

यथाम्बराम्बुरुहम् ।

नोपलभ्यते चोपलब्धिलक्षणप्राप्तं सामान्यं क्वचिदपीति स्वभावानुपलब्धिः ।

न चात्रासिद्धिदोषोद्भावनया प्रत्यवस्थातव्यम् । तथा हि अत्रासिद्धिः भवन्ती स्वरूपतो विशेषणतो वा भवेत् ? तत्र न तावदाद्या[6] संभवति, अन्योपलम्भरूपस्यानुपलम्भस्याभ्युपगमात् । तस्य च स्वसंवेदनप्रत्यक्षसाक्षात्कृतस्वरूपत्वात् कुतः स्वरूपासिद्धिदोषावकाशः ?

अथोच्यते स्वसंवेदनमेव न संभवति, स्वात्मनि क्रियाविरोधात् । न हि तयैवासिधारया सैवासिधारा च्छिद्यते; तदेवाङ्गुल्यग्रं तेनैवाङ्गुल्यग्रेण स्पृश्यत इति । अतोऽसिद्ध एवायं हेतुः । [7] तदिदं स्वसंवेदनशब्दार्थापरिज्न्ँआनविजृम्भितमेव प्रकटयति वाचः ।

तथा हि कलसकलधौतकुवलयादिभ्यो व्यावृत्तं विज्न्ँआनमुपजायते । तेन बोधरूपतयोत्पत्तिरेवास्य स्वसंवित्तिरुच्यते, प्रकाशवत् । न कर्मकर्तृक्रियाभावात् । एकस्यानंशरूपस्य त्रैरूप्यानुपपत्तितः । यथैव हि प्रकाशकान्तरनिरपेक्षः प्रकाशः प्रकाशमान आत्मनः प्रकाशक उच्यते, तथा ज्न्ँआनमपि ज्न्ँआनान्तरनिरपेक्षं प्रकाशमानमात्मनः प्रकाशकमुच्यते ।

ततोऽयं पर /p. 83b/ मार्थः । न ज्न्ँआनं ज्न्ँआनान्तरसंवेद्यमुपपद्यते, नाप्यसंविदितमुच्यते । यथा प्रकारे च स्वसंवेदनशब्दार्थे विवक्षिते न किन्ँचिद्[8] वचनीयमस्ति कुतो यथोक्तदोषावसरः ?

/p. 14/

नापि विशेषणासिद्ध्यासिद्धिरुद्भावनीया । उपलब्धिलक्षणप्राप्ततया सामान्यस्य स्वयमेव परैरुपगमात् । तथानभ्युपगमे वा न सामान्यबलेन[9] बाहुलेयादिष्वनुगताकारौ धीध्वनी स्याताम् । न हि यतो यत्र ज्न्ँआनाभिधानप्रवृत्तिः, [10] तदनुपलक्षणे तस्य प्रतीतिर्भवति, दण्डिवत् ।

यत् पुनरिदमुद्द्योतितम् उद्द्योतकरेण, किं सामान्यं प्रतिपद्यसे न वा ? यदि प्रतिपद्यसे, कथमपह्नुषे ? अथ न प्रतिपद्यसे, तदा तस्यासिद्धत्वादाश्रयासिद्धो हेतुः ।

तदिदं तस्य [11] धर्मिस्वरूपतानभिज्न्ँअताविजृम्भितमाभाति, यतो न वयं बहीरूपतया सामान्यं धर्मितयाङ्गीकुर्महे, अन्तर्मात्रानिवेशिनो भावाभावोभयानुभयाहितवासनापरिपाकप्रभवस्याध्यस्तबहिर्वस्तुनो ज्न्ँआनाकारस्य धर्मितयोपयोगात्[12] । स च स्वसंवेदनप्रत्यक्षसिद्धतया न शक्यः प्रतिक्षेप्तुम् ।

तदत्र धर्मिणि व्यवस्थिताः सदसत्त्वे चिन्तयन्ति । किमयं सामान्यशब्दविकल्पप्रतिभासार्थो धर्मी परपरिकल्पितबहिःसामान्यनिबन्धनो वेति ? तस्य बाह्यानुपादानत्वे [13] साध्यतयानुपलम्भो हेतुः । न पुनस्तस्यैवाभावः प्रसाध्यते, तद्विषयशब्दाप्रयोगप्रसङ्गात् । एवंविधे च धर्मिणि विवक्षिते कुत आश्रयासिद्धिदोषः ?

यत् तूच्यते, प्रत्यक्षप्रमाणसिद्धस्वभावतया सामान्यस्यासिद्ध एवायं हेतुरिति तदयुक्तम्, तस्य स्वरूपेणाप्रतिभासनात् ।

इदमेव हि प्रत्यक्षस्य प्रत्यक्षत्वम्, यत् स्वरूपस्य स्वबुद्धौ समर्पणम् । इदं पुनर्मूल्यादानक्रयि सामान्यं स्वरूपं च नादर्शयति, प्रत्यक्षतां च स्वीकर्तुमिच्छति । तथा हि न वयं परस्परासङ्कीर्णशाबलेयादिव्यक्तिभेदप्रतिभासनवेलायां तद्विलक्षणमपरमनुगतमध्यक्षेणेक्षामहे, [14] कण्ठेगुणमिव भूतेषु, शाबलेयसामान्यबुद्धेरसिद्धेः । तत् कथमदृष्टकल्पनयात्मानमात्मना विप्रलभेमहि ? इति नासिद्धो हेतुः ।

---

4 प्रविश्य S
5 °राकल्य° S
6 °दाद्यं S
7 तदेदं R
8 वचनीयकमस्ति S
9 वा कुलेया° S
10 °लम्भने ?
11 °पिता° S
12 °नुभवाहित° S °पगमात R
13 साध्ये तथानु° ?
14 कण्ठेशन° S

नाप्यनैकान्तिकता शङ्काविषयमतिपतति, विपक्षवृत्त्यदर्शनात् । असपक्षे संभवानुपलम्भात् साधारणानैकान्तिकता मा भूत्, सन्दिग्धविपक्षव्यावृत्तिकता तु प्रतिबन्धादर्शनादनिवारितप्रसरैव ।

/p. 15/

[15] तदेतदनालोचिततर्ककर्कशधियामभिधानम्, विपर्यये बाधकप्रमाणसामर्थ्यादप /p. 84a/ सारितसद्भावत्वात् तदाशङ्कायाः । तथा हि असत्त्वे साध्ये सत्त्वं विपक्षः । तत्र प्रत्यक्षवृत्त्या भवितव्यम्, यतो यद् यदाविकलाप्रतिहतसामर्थ्यम्, तत् तदा भवत्येव । तद् यथा अविकलबलसकलकारणकलापोऽङ्कुरः । सति च चक्षुरादिसाकल्ये दृश्ये वस्तुन्यविकलाप्रतिबद्धशक्तिकारणं प्रत्यक्षं ज्न्ँआनमिति स्वभावहेतुः । ततो विरुद्धोपलम्भाद् विपक्षाद् व्यावर्तमानो हेतुरसद्व्यवहारयोग्यत्वेन व्याप्यत इति व्याप्तिसिद्धेर्नानैकान्तिकः ।

अभिमतसाध्यप्रतिबन्धसिद्धेस्तु विरुद्धता दूरतरसमुत्सारितरभसप्रसरैव ।

ततोऽसिद्धतादिदूषणशङ्काकलङ्कानङ्किताद्धेतोः [16] प्रस्तुतवस्तुसिद्धौ सिद्धम् असत्त्वं सामान्यस्येत्यलमतिबहुविस्तरविसारिण्या कथयेति विरम्यते ।

न च वस्तुसंस्थानवत् सामान्यं [17] व्यक्तेर्लक्षणम् । न चानुवृत्तव्यावृत्तवर्णाद्यात्मके जातिव्यक्ती वर्णादिनियतप्रतिभासप्रतीतिप्रसङ्गात्, व्यक्तेरेवासौ प्रतिभास इति चेत् ? कोऽपरस्तर्हि सामान्यस्यानुगताकार इति चेत् ? ननु वर्णसंस्थाने विरहय्य किमपरमनुगामि विद्यते ? जातिव्यक्त्योः समवायबलादविभावितविभागयोः क्षीरोदकयोरिव परस्परमिश्रणेन प्रतिपत्तिरिति चेत् ? न तर्हि सामान्यविशेषयोरेकतरस्यापि रूपं गृहीतम् । स्वरूपाग्रहणे अनयोरप्यग्रहणमिति निरालम्बनैव सा तादृशी प्रतिपत्तिरिति परमार्थ आवेदितस्तावत् । निरालम्बनया च प्रतीत्या व्यवस्थाप्यमानं सामान्यं सुव्यवस्थापितम् ।

तस्माद् विशेष्यासिद्ध्यापि नायमसिद्धो हेतुः ।
सपक्षे वर्तमानो विरुद्ध इत्यपि न मन्तव्यः ।
अनैकान्तिकताप्यस्य न संभावनामर्हति ।

असद्व्यवहारानपेक्षत्वेन हि दृश्यानुपलम्भो व्याप्तः । यदि हि सन्नपि तत्र न प्रवर्तयेत्, इह सापेक्षः स्यात् । ततो विपक्षाद् व्यापकविरुद्धावरुद्धाद् /p. 16/ व्यावर्तमानोऽसद्व्यवहारे विश्राम्यतीति । अतस्तेनासद्व्यवहारेणानुपलम्भो [18] व्याप्त इति कुतोऽनेकान्तः ? ततश्च स एवार्थः समायातः ।

एतासु पन्ँचस्ववभासनीषु
प्रत्यक्षबोधे स्फुटमङ्गुलीषु ।
साधारणं षष्ठमिहेक्षते यः
शृङ्गं शिरस्यात्मन ईक्षते [19] सः ॥

इति ।

सर्वस्य च पूर्वोक्तस्यायं परमार्थः ।
प्रत्यक्षप्रतिभासिवर्ष्मसु न पन्ँचस्वङ्गुलीषु स्थितं [20]
सामान्यं प्रतिभासते न च विकल्पाकारबुद्धौ तथा ।
ता एवास्फुटमूर्तयोऽत्र हि विभासन्ते /p. 84b/ न जातिस्ततः
सादृश्यभ्रमकारणौ पुनरिमावेकोपलब्धिध्वनी ॥
इति सामान्यसिद्धिदूषणा दिक् प्रसाधिता [21] ॥

॥ कृतिरियं पण्डिताशोकस्य ॥

---

15 तदेतन्न समा° S
16 अतः…क ? लङ्कि कृता° S
17 सामान्यं न ?R
18 व्याप्यत इति S
19 ईप्यते R
20 °वर्त्म न पन्ँच…लीषु स्थितम् S, °भासि धर्मसु S. Intro. p. V, °ष्ववस्थितम् R.
21 प्रसारिता S.